# Devakali Ashtakam Devakali Mahima Stotram

# દેવકાલ્યષ્ટકમ્ અથવા દેવકાલીમહિમા સ્તોત્રમ્

## Document Information

Text title : devakAlyaShTakam

File name : devakAlyaShTakam.itx

Category : devii, aShTaka, devI, dashamahAvidyA

Location : doc_devii

Author : Durgaprasad DvivedI

Transliterated by : Rajani Arjun Shankar

Proofread by : Rajani Arjun Shankar

Latest update : October 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 9, 2022

*sanskritdocuments.org*

# દેવકાલ્યષ્ટકમ્ અથવા દેવકાલીમહિમા સ્તોત્રમ્

તે દેવકાલિ ! કલિકર્મ વિનાશયન્તિ
વન્દારુ-સંહતિષુ શર્મ વિકાશયન્તિ ।
જ્ઞાનામૃતાનિ હૃદયે પરિવાહયન્તિ
યે તાવકીન-પદપઙ્કજમર્ચયન્તિ ॥ ૧॥

તે દેવકાલિ ! કુલ-કીર્તિમુદઞ્ચયન્તિ
દિક્ષુ પ્રતાપ-પટલીમવતંસયન્તિ ।
વિદ્યા-પરિષ્કૃતિ-ચણાનપિ મૂકયન્તિ
યેऽન્તઃ સદૈવ ભવતીમધિવાસયન્તિ ॥ ૨॥

તે દેવકાલિ ! ભુવનાનિ વશં નયન્તિ
શિષ્ટિં નૃપેન્દ્ર-મુકુટેષુ નિવેશયન્તિ ।
દુઃખાન્ધકાર-પટલાનિ વિપાટયન્તિ
યે ત્વામુદાર-કરુણામસૃણાં શ્રયન્તિ ॥ ૩॥

તે દેવકાલિ ! કવિતામૃતમૂર્જયન્તિ
સંસત્સુ વાદ-નિપુણાનપિ તર્જયન્તિ ।
કામાદિ-કર્કશ-રિપુ-પ્રકરાઞ્જયન્તિ
યે તાવક સ્મરણ-સૌભગમાર્જયન્તિ ॥ ૪॥

તે દેવકાલિ ! કલિસમ્પદમર્દયન્તિ
દુર્વાસનાન્ધ-તમસાનિ વિમર્દયન્તિ ।
સૌભાગ્ય-સારિણિ ! જગન્તિ પવિત્રયન્તિ
યે શ્રીમતીં હૃદય-વેશ્મનિ ચિત્રયન્તિ ॥ ૫॥

તે દેવકાલિ ! સુખ-સૂક્તિમદભ્રયન્તિ
વિદ્યા-કલાપ-કૃષિ-મણ્ડલમભ્રયન્તિ ।
દેશાન્તરેષુ ચરિતાનિ વિશેષયન્તિ
યે શર્મ-ધામ તવ નામ નિરૂપયન્તિ ॥ ૬॥

તે દેવકાલિ ! કુકૃતાનિ નિકૃન્તયન્તિ
    સંસાર-દુઃખ-નિગડાનિ વિભઞ્જયન્તિ ।
શાન્તિં પરામધિમનઃ પરિચારયન્તિ
    યે તવત્કથામૃત-રસાન્ સતતં ધયન્તિ ॥ ૭॥

તે નૂત્નેન્દીવરાભે ! ભવભય-જલધિં શીઘ્રમુલ્લઙ્ઘયન્તિ
    પ્રધ્માતસ્વર્ણવર્ણે ! નિખિલ-સુખ-કલોલ્લાસમાસાદયન્તિ ।
ફુલ્લન્-મલ્લી-મતલ્લી-પ્રતિભટ-સુષમે ! હર્ષમુત્કર્ષયન્તિ
    શ્રીમાતઃ ! સતતં યે તવ ભજનવિધૌ ચિત્તમાયોજયન્તિ ॥ ૮॥

અયોધ્યા-પ્રાન્ત-વાસિન્યાઃ સુદર્શન-કૃતસ્થિતેઃ ।
દેવકાલ્યાઃ સ્તોત્રમેતત્ પઠતાં ઘટતાં શિવમ્ ॥ ૯॥

ઇતિ શ્રીદુર્ગાપ્રસાદદ્વિવેદીવિરચિતં દેવકાલ્યષ્ટકમ્ અથવા દેવકાલીમહિમા સ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Rajani Arjun Shankar

---

*Devakali Ashtakam Devakali Mahima Stotram*

pdf was typeset on July 9, 2022

Please send corrections to *sanskrit@cheerful.com*